**Shri Raghunath Temple MSS. Library,**
**JAMMU**

No. ५८६-घ

Title शृङ्गारसार-सङ्ग्रहः

Author शम्भुदासः

Extent १० Age

Subject काव्यम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शृंगाररससंग्रहः

५८६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सं० ५८८९ क
शृङ्गार सप्तक
[illegible] - १० समाप्त
[illegible] -
कर्ता - [illegible]

काव्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥श्रीगणेशाय नमः॥ अथ मंगलाचरणम् सानंदं नंदिहस्ताहतमुरजरवाहूतकौमारबर्हित्रासा
नासाग्ररंध्रं विशति फणिपतौ भोगसंकोचभाजि गंडोड्डीनालिमालामुखरितककुभस्तांडवे शू
॥१॥ लपाणेर्वैनायक्यश्चिरं वो वदनविधुतयः पांतु चीत्कारवत्यः १ दिष्टो हस्तावलग्नः प्र
सभमभिहतोप्याददानोंशुकांतं गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण
आलिंगन्योवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः कामीवार्द्रापराधः स द
हतु दुरितं शांभवो नः शराग्निः २ तपस्वी कां गतोवस्थामिति स्मेराननाविव
गिरिजायाः कुचौ वंदे भवभूतिसिताननौ ३ उत्तिष्ठंत्या रतांते भरमुरगपतौ पाणिनै
केन कृत्वा धृत्वा चान्येन वासो विलुलितकबरीभारमंसे वहंत्याः भूयस्तत्कालकांति
द्विगुणितसुरतप्रीतिना शौरिणा वः शय्यामालिंग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः
पुनातु ४ इति मंगलाचरणम् अथ नायिकावर्णनम् अनुच्छिष्टो देवैः परि
लिनो राहुः दशनैः कलंकेनास्पृष्टो न खलु परिभूतो दिनकृता कुहूभिर्नो लि

नवयुवतिवक्त्रेण विजितः कलानाथः कोयं कनकलतिका वामुद्यते ५ किमिंदुः
किं पद्मं किमु मुकुरबिंबं किमु मुखं किमब्जे किं मीनौ किमु मदनबाणौ किमु दृशौ ख
गौ वा पुष्पौ वा कनककलशौ वा किमु कुचौ तडिद्वा तारा वा कनकलतिका वा किम
बला ६ हारवर्णनम् अन्येपि संति गुणिनः कति नो जगत्यां हारत्वमेव गुणिना
मुपरि स्थितोसि एणीदृशामुरसि नित्यमवस्थितस्य सद्वृत्तता च शुचिता च न खंडिताते
७ मुक्ताहार गुणीभूयनोपस्पर्शपस्तनस्तवया वैभवेयस्य काठिन्यं व्यर्थं तदुपस
र्पणम् ८ रत्नाकरे परिहृता वसतिः किमन्यदंगीकृतः कठिन वेदनडःखभारः
ते ४ वक्षोज कुंभपरिरंभणलोलुपेन किं किं न विहितं बत मौक्तिकेन ९ अथ रोमावली व
दन्नं मया पदमिदं नवयौवनाय त्वं सत्वरं क्वचन शैशव साधयेति कामस्वहस्त लिखि
तातरमालिकेव रोमालिका विजयते जलजेक्षणायाः १० इयं स्पष्टा विद्युत्कनक
लतिका पंकजभुवा निषिक्ता लावण्यामृतरसभरेणानुदिवसं अकस्माद्रोमाली

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मधुपपटली हस्फुरति यन्नतः शंके पुष्पोद्गमपसमयमायातमधुना ११ रचयति युवने
त्रहेत्रपीयूषवटर्षिं नवजलधरलेखा रोमराजि छलेन चउपति कलाधिप भ्रांक्षिये यं नदूद्रैः
स्तनघनसमयो स्मामाविरस्तीति विप्रः १२ उत्तुंगास्तनपर्वतादवतर अंगे वहाराबली रोमा
॥२॥ लीनवनीलनीरद रुचिः सेयं कलिंगात्मजा जातं तीर्थमिदं सुरू एपजन कं यत्रान वो: ५
2 संगमः चंद्रोम न्नति लांछनाय हृन्मभे नूनं न खांक छलात् १३ जंभावर्णनम् श्रमस्वेदो
परिवेषवद्भूतिपने घ्यां पेय कोदंडवद् भ्रिलांबुमद्वत्तुण एयुतिवदासज्योत्स्नि पंतीभुजौ वि
क्षिप्य हूलिलत्तणमि विगलनीब्युत्थमनमध्यमं किंचित्किंचिदुदंचदंचलमहो कुंभस्त
नी जंभते १४ वेणीवर्णनम् एणीदृशः पाणिपुटे निरूढा वेणी विरेजे शयनोत्थितायाः
सरोजकोशाद्दिव निःसरंती श्रेणी यनीभूय मधुव्रतानाम् १५ वयःसंधिवर्णनम् सं
नद्धो यं नवतरुणिमा कामममास्कंदुकामो नैनां मुंचत्यहह हसह साकौतुकी बालभावः य
द्वैराज्यं वरतरतनु स्वर्णभूमौ प्रवृत्तं प्रायस्तस्मादनुदिनमयं क्षीयते मध्यदेशः १६
मंदं मंदं भ्रवण पुटकोपांतगं ताहगंतः किंचित्किंचिद्हिरमति मनोधत्ति केली रसेप्सः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आविर्भावि स्तनमुकुलयोः कापि कांतिः समंताद्यस्योवाकुसुमधनुषो यौवराज्याभिषेकः ॥१७॥ दृष्टे सा
लसतां विभर्ति न शिशुक्रीडासु बद्धादरा श्रोत्रे प्रेषयति प्रवर्तितसखीसंभोगवार्तास्वपि पुंसामंकमपेत
शंकमधुना नारोहति प्राग्यथा बाला नूतनयौवनव्यतिकरावष्टभ्यमाना पुनः ॥१८॥ कुरंगीवांगा
नि स्तिमितयति गीतध्वनिषु यत्सखीं कांतोदंतं श्रुतमपि पुनः प्रश्नयति यत् अनिद्रं यच्चांतः स्वपिति
तदहो वेद्म्यभिनवां प्रवृत्तोस्याः सेक्तुं मनसि मदनः प्रेमलतिकाम् ॥१९॥ अपांगे लोचनकोणे एव कूप
एकत्वायते सर्वदा कंठे काकुवचः प्रसून कमलक्रोडस्थमंगायते हारा वोहृदये वियोगिकुलजाकामा
भिलाषायते वैदेही विरहज्वरो रघुपतेरापाकतापायते ॥२०॥ मदनदहनक्लिष्टकांतकांता
कुचांतर्घनमलयजपंके गाढवद्धाखिलांघ्रिः उपरि विततपक्षो लक्ष्यते लिर्निमग्नः शरइव कुसु
मेशोरेषपुंखावशेषः ॥२१॥ स्मरत्वं सर्वस्वं कुचकलशयोः पंकजदृशो ध्रुवं हृत्वा मुद्राम हृतन मरव
यो। नीलिमभिघात् न चेद्दिग्धं व्यर्थं कथयकथमेता विहरतैनं स्मरं तं पथुंपंनं प्रहरति शरैरेष विष
मैः ॥२२॥ स्वामी निश्वसितेप्यसूयति मनो जिघ्रः सपत्नीजनः श्वश्रूरिंगितदैवतं नयनयोरीहालि
ह्यो यातरः तद्दूरादयमं जलिः किममुना दृग्भंगिभावेन ते वैदग्धी विविधप्रवंधरसिकव्यर्थी

यपत्रभ्रमः ॥२३॥ एषा कामकृतस्मृतिर्विलुलितवदना स्वेदलग्नांगवस्त्रा मत्पूर्वे याति बाला स्मरगहवच
किता सर्वतः शंकयंती केनेदं वक्त्रपद्मं मधुरमधुरसं खंडितं केन पीतं स्वर्गः केनाद्य भुक्तो हरनयनह
तो मन्मथः कस्य तुष्टः ॥२४॥ गर्जति वारिदपटले वर्षति तिनयनारविंदमबलायाः भुजवल्लिमूलसेको
विरहलतापल्लवं सूते ॥२५॥ मधु तिष्ठति वाचि योषितां हृदि हालाहलमेव केवलं अत एव निपीयते
॥३॥ धरो हृदयं मुष्टिभिरेव ताड्यते ॥२६॥ जाता लता हि शैले जातु लतायां न जायते शैलः संप्रति तद्वि
3 परीतं कनकलतायां गिरिद्वयं जातम् ॥२७॥ निद्रानंदं हिल्लषोएलोचनयुगं दंतां किंदं तदद्य दंपयी ३१०
स्तालकवल्लि घर्मपटलप्रोन्मृष्टपत्रावलि भ्रंभाजं भिन्नघुसृणधूसरभमि लड्डुगीभिरंगीकृतस्तो
त्रं शंसति वक्त्रमेव रजनीवृत्तांतमेणीदृशः ॥२८॥ तन्विस्तनौ तवाकारि विसर्ग इति मन्महे आः पदं
यत्र भाषंते तौ विलोक्यैव कामिनः ॥२९॥ तन्वंग्या गुणसन्निधौ नयनयोर्धिग्हारिसंस्तवनं तेनं
तमिलितेन मन्मथशिखी सिक्तो दियोगोद्भवः मन्ये तस्य निरस्यमानकिरणस्यैषा मुखेनोज्झितास्वा
सा पाससमाकुलालि सरणि व्याजेन धूमावलिः ॥३०॥ अकारि मदुच्चंचलं स्तनतटीडकुलं
चलं गतं लघु विलोकितं नयनसीम्नि दोलायितं त्रपा चपलरे मनस्त्वमधुनापि नालंबसे वचोर

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

चनाचातुरीनकुलकामिनीनांक्रमः॥३१॥दृष्ट्वैकासनसंस्थितेप्रियतमेपश्चादुपेत्यादरादेक
स्यानयनेनिमील्यविहितक्रीडानुबंधच्छलःईषद्वक्रितकंधरःसपुलकःप्रेमोल्लसन्मानसाम्
तर्हासलसत्कपोलफलकांधूर्त्तोपरांचुंबति॥३२॥नूनमाज्ञाकरस्तस्याःसुभ्रुवोमकरध्वजः
यतस्तन्नेत्रसंचारसूचितेषुप्रवर्त्तते॥३३॥धिक्तस्यमंदमनसःकुकवेःकवित्वंयःस्त्रीमुखंचहि
नविंबसमंकरोति भ्रूभंगविभ्रमकटाक्षनिरीक्षणानिकोपप्रसादहसितानिकुतःशशांके॥३४॥
ग८ प्रायश्छिन्नेनहीतस्तनंगमाःपतितौकुचौअतएवतयोस्पर्शेलोकोयंशिथिलादरः॥३५॥पयोधरा
कारधरोहिकंडुकःकरेणरोषाद्विहन्यतेमुहुःइतीवनेत्राकृतिभीतिमुत्पलंतस्याःप्रसादायप
पातपादयोः॥३६॥प्रियाविरहितस्यास्यहृदिचिंतासमागताइतिमत्वागतानिद्राकेकृतघ्नमुपासते
॥३७॥बालायानवसंगमेनिपुणतांप्रेक्षान्यथाशंकितःपत्युश्छिन्नमवेक्ष्यपंकजमुखीतत्याश्वंकु
ञ्जेलिखतएकंमत्तमतंगजंतदुपरिक्रोधात्पतंतंशिशुंसिंहीगर्भविनिसृतांहृद्वपुर्बाहृष्टैवतुष्टेभ
वत्॥३८॥यथायथाविशालस्याःहृदयेहृदयेश्वरःतथातथाबहिर्यातोमन्येसंकोचतःकुचौ
॥३९॥यथायथास्याःकुचयोःसमुन्नतिस्तथातथालोचनमेतिवक्रतांअहोहसंतेवनतोपरो
दयंनिसर्गतोनमीलिनाह्यसाधवः॥४०॥विघूर्णितविलोचनाविगतरागबिंबाधराविभूषित

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मुखांबुजा विरलघर्मपाथःकणैः विकीर्णकबरीभरग्नपुष्पन दर्शितोच्चस्तनी विलासमणिमंड्यापहृहि
रूपेतिशान्तो रौ ॥४१॥ यत्र यत्र चलतेशनैःशनैः सभ्रूवोनयनकोणविभ्रमः तत्रतत्र शतपत्रधो
रणीतोरणीभवतिपुष्पधन्वनः ॥४२॥ विक्रीय विस्मयमुखेन वालामालाहृतः कैरवकोरका
॥४॥ णि विकेतुकामा विकचांबुजानि चेलांचलेनाननमावृणोति ॥४३॥ शंकामहं खलितेनयत्रनयनप्रां
५ तेन न प्रेत्यते के रुरधवनिभ्रूरिभीतिचकितंनो यत्रवाश्लिष्यते नोवायत्रशनैरलग्नदशनविंबा
धरः पीयते नोवायत्रविधीयतेचमणितं तत्किंरतं कामिनोः ॥४४॥ उद्भूतं किमिदं मनोभवनृप
क्रीडारविंदद्वयं तत्स्तूतिः कथमेकतस्तनुलसद्रोमावली नालतः चक्रद्वंद्वमयोन्नतं तदपि किं स्या
त्तुमुखेंदोः पुरालावण्यांबुधिमग्नयौवनगजस्यावेमिकुंभद्वयम् ॥४५॥ संवरणाय वधूटीव हूप
रिपाटीकरोत्तु किंतेन संप्रतिरजनिरहस्यं नयनालस्यं निवेदयति ॥४६॥ अंगानि मे दहतु कांत
वियोगवह्निः संरक्षतां प्रियतमो हृदिवर्त्ततेयः इत्याशयाशशिमुखीगलदश्रुवारि धाराभिरुष्ण
मभिषिंचति हृत्प्रदेशं ॥४७॥ गेहेगेहे रहसिसुदृशो रामभद्रेति नीशं त्वामालिख्यस्वपमिससवि
धे सस्पृहांभावयंत्यः अस्मिन्नाकस्मिकमुपगते वल्लभे भीतिभाजः पोष्यं चापं तवकरतलेवे
पमाना लिखंति ॥४८॥ आलापे विरमत्यमीलतणो मीलत्यणो निमीषः शय्यायांसुरतपरिश्रमेण स
॥४॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

न्निः आश्लेषे भुजलतयोः त्वरंग्लपत्वं धन्यानामिति विरहो मतिस्तु शेषः ॥४९॥ श्रृंगाररसामृतसरसी किमियं
मग्नाहीनि मग्नमत्र किमनेन मतंगजेन उन्मज्जतः पयोधरयोर्मिषेणाकुंभद्वयं पश्यतामस्य किमुज्जि
हीते ॥५०॥ अविदितसुखदुःखं निर्गुणं वस्तु किंचिज्जडमतिरिह कश्चिन्मोक्ष इत्याचचक्षे मम तु म
तमनंगस्मेरतारुण्यघूर्णन्मदकलमदिराक्षीनीविमोक्षो हि मोक्षः ॥५१॥ चित्रं कनकलतायां पल्लव एवा
सतं सूते कुसुमसमुद्गमसमये जाने किं परं भावि ॥५२॥ अमुंचंतौ ह्रियामानं शरस्तौ परस्परं आ
नर्चतुः प्रहृष्टं तारं हृदा हरिणदंपती ॥५३॥ त्वषितां हरिणीं हरिणस्त्वषितं हरिणं विजानन्तौ हरिणी मि
नमंबु पल्वलस्यं कपटं पिबतः परस्परालोकम् ॥५४॥ अपि यस्य विधृताः केशाः कंठे लग्नं भुजे वलितं
मञ्जोत्पारसहितं धौ किं किंनु कृतं तया सहसा ॥५५॥ कांतः कुंचादेक करेणावृणीमे सखीदृशः कर्ष
कौतुकेनति अन्यागनासामपि मृद्धि है तोः कृ ष्यामंडगीमिव हेमकुंभात् ॥५६॥ कामनापि कामाति नाथक
वाक्यं आक्षिपसि कर्णमद्गणा वलिरपि वद्धस्तया त्रिधामध्ये इति जितसकलवदान्ये तनुदानेलज्ज
सेतन्वि ॥५७॥ इंदीवरेण नयनं मुखमंबुजेन कुंदेन दंतमधरं नवपल्लवेन अंगानि चंपकदलैः
सविधाय धाता कांते कथं रचितवानुपलेन चेतः ॥५८॥ कोपस्त्वया यदि कृतो हृदि पंकजाक्षि
सोस्तु प्रिय स्तव किमस्ति विधेयमन्यत् आश्लेषमर्पय मदर्पितपूर्वमुच्चैः उच्चैः समर्पय मदर्पित

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भुवनं च ॥५९॥ विमुंचामुं मानं सफलय वचः सा धृतहृदो प्रिये प्रख्यं तं गां न्यस्त नमिव ते सिं चतु वचः निदा
नं सौख्यानां तणमभिमुखं स्थापय मुखं न मुग्धे भ्रत्येतं प्रभवति गतः कालहरिणः ॥६०॥ उद्भिद्यां वरमु
च्चेतास्तु घटिताकारेण सद्वृत्तना किं चान्यस्य रकाय पाणिकमलस्य श्रीपिसोत्कं ठता सर्वक्रीडनकं डका
॥५॥ कुचयुगं वालेन वाधीनवम्यानाडम्यतनस्पर्शितणविधौ मोघं कुतो स्यागतं ॥६१॥ तवैष विद्रुमवा
यो मरुमार्ग इवाधरः करोति कस्य नो मुग्धे पिपासाकुलितं मनः ॥६२॥ तव वदनाम्बुज पंके लोचन
5 युगलं प्रमादतः पतितं चेनो गतमद्वर्तं तदपि कुचकुंभयोरंतरे मग्नं ॥६३॥ भ्रूचापे निहितः कटाक्ष
विशिखो निर्मातु मर्मव्यथां श्यामात्मा कुटिलः करोतु कवरीभारो पि मारोद्यमं मोहं तावदयं च तन्वि
तनुतां विंबाधरो रागवान् सद्वृत्तः स्तनमंडलस्तव कथं प्राणैर्मम क्रीडति ॥६४॥ भस्तुंगौ कठिनौ तन्वि
पीनौ स्तम्भुखिडम्बे रवौ च्च तणवव हिर्यातौ हृदपानौ पयोधरौ ॥६५॥ माद्यिनी वेपि गोरा गिस्तानेस्वय
चंदनं प्रश्लेषमिलि तावयहेमाचलहिमाचलौ ॥६६॥ रंगेमयि प्रणयकेलिकलाविलासैरापूर्य
देह मिह साध्य य यौवनांते पश्य प्रतितणमपूर्वरसप्रधानमायुः पयः पिवति कालविडालएषः ॥६
स्मिन्न पुष्पोद्गमो यत्नेह प्रपतेधरपल्लवे फलं तु जातं मुग्धाद्धि चक्षुषोर्मम पश्यतः ॥६८॥ लोचनेह ॥५॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रिणधावलोचनेमाविभूषयरूपांगिकज्जलैः ऋद्‌एवयदिजीवहारकः सायकोनगरलेनलिप्यते ६९
नयननिपातांकुरितः पल्लवितोवचसिपुष्पितोहसितेफलतुरूपांगितवांगस्पर्शेनमनोरथोस्माकं ॥७०॥
उचितंगोपनमनयोः स्तनयोःकनकाद्रिकीर्तितिरस्करयोः अवधीरितविधुमंडलमुखमंडलगोपनंकि
मिति ॥७१॥ अयमुक्ताफलमवलेकिमधरकांत्याचविद्रुमंकुरुषेदृष्टागुंजाबीजं शिवशिवहसितेनमो
क्तिकंभूयः ॥७२॥ सुधामयोपि दयरोगशांत्यैनासाग्रमुक्ताफलकच्छलेन अनंगसंजीवनदृष्टश
क्तिर्मुखामृतंतेपिबतीवचन्द्रः ॥७३॥ मुग्धेधानुष्कतांकेयमपूर्वातवदृश्यते यया विध्यसिचेतांसि
गुणैरेवनसायकैः ॥७४॥ दीएंमुः शशलांछनः शशिमुखिंवीक्ष्यैणनकोपस्तवस्मेरंपद्मवनंमनाग
पिनतेस्मेरंमुखांभोरुहं पीतंश्रोत्रपुटेनषट्पदरुतं पीतंननतेजस्मितं रक्ताशक्रदिगंगनारविकरैर्नी
यापिरक्तासिकिं ॥७५॥ स्मर्यतेसहिवामोरु स्थितोयोहृदयाद्बहिः मच्चित्तभित्तौभवतीशालभंजी
वराजते ॥७६॥ आयातासिविमुंचवेपथुभरंदृष्टासिकेनापिनोनीलंचोलममुंविमुंचहरतुस्वेदंनि
शीथानलः इत्यंतर्भयसन्नकंठमसकृद्धामीतितल्पंगतात्रस्यंतीपरिरभ्यतेसुकृतिभिःस्वैरंनवस्वै
रिणी ॥७७॥ उपविशमंडनतल्पेकल्पितपल्लवौघेनियमयकचभारं स्रस्तमंसस्थलीषु इहहिम
लयजन्मामारुतोमंदमंदं पिबतुतनवकपोलालंबिनः स्वेदबिंदून् ॥७८॥ अपरस्तनवर्णनेनेबाबेग

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मृदुतरतनुस्तावकीनं विसोढुं शक्तानेनांचपलनितरां खिद्यें दीवरातीम् इत्थ ध्यासं विदधतइति भाएनाचस्पगात्वाक
र्णौ यांते निम्नतनिम्नं तं न्द्धरंध्रं संतीव ॥७९॥ प्रयांते न्द्रपुरात्वे ष्टपते मे खलाध्वनिः मृदु कान्तेरत प्रोते का
मिनी पुरुषायते ॥८०॥ वलाकुचव्याकुलकेशपाशं स्वेदाम्बुखं स्त्रीकृतमंदहासं प्रणाति रेकात्पुरुषालभंते पुं
॥दि॥ भावमंभोरुहलोचनानाम् ॥८१॥ वियति विलोलति जलदः स्खलति विद्युज्ज्वलति कूजति कपोतः निध्यतिति तारका
6 ततिरांदोलयति वीचिरमरवाहिन्याः ॥८२ यांते मन्मथसंगरे रणम्नतां झत्कारमातन्वती वासोदाञ्जघनस्य
पीनकुचयोः हारं स्रुतेः कुंडले बिंबोष्ठस्य च वीटिकां स्तनयन्नापाद्योरणत्कं कणेप्रया लंबिनके शपाश
निचये पुष्पोहिवद्धक्रमः ॥८३॥ न्याप्लेश्चापो घारतिरंगनानामारोदश्रेषा कुचकुंभमश्रीः तूणीरशेषः कु
सुमायुधोपि प्रभात शेषा रजनीव भूव ॥८४॥ मत्तेभकुंभपरिणाहिनि कुंकुमार्द्रे कांतापयोधरयुगे रविखे
दखिन्नः वक्षो निधायभुजपंजरमध्यवर्त्ती धन्यः क्षपांक्षपयतित्क्षणलब्धनिद्रः ॥८५॥ उपरिनिपतितानां
स्रस्तधम्मिल्लकानां मुकुलितनयनानां किंचिदुन्मीलितानाम् स्फुरतजनितखेदक्लिन्नगंडस्थलीनामधर
मधुवधूनां भाग्यवंतः पिबंति ॥८६॥ खिन्नं मंडलमेंदवं विगलितस्त्रग्धाम वर्द्धतमः प्रागेव प्रथमानकेतक
शिखावीरायितं विस्मृतम् शांतं कुड्मैंदवं विगलितं द्वंद्वं तिरोमीलितं वीतं विद्रुमसीत्कृतं नहि तत्तो जाने किमा
सीदिति ॥८७॥ मुक्ताभूषणमिंदुबिंबमजनि व्याकीर्णतारं मनः स्मारं चापमपेत चापलम भूदिंदीवरे मुह्य
ने विश्रांतं कलकंठिकंठरणितं मंदानिलैर्मंदितं निष्पंकस्तवकाच चंपकलता साभून्नजाने यकिं ॥८८॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥ अभिसारिकावर्णनम् ॥ घनमस्थितासि करभोरु घने निशीथे जीवाधिको वसति जनः प्रियो मे एकाकिनी
वद कथं न बिभेषि बाले नन्वस्ति पुंखितशरो मदनः सहायः ॥ ८९ ॥ चित्रं त्वस्मादपि विषधराद्भीतिभाजो
निशायां किं नु ब्रूमस्तव दभिसरणे साहसं नाथ तस्याः ध्वान्ते गाढे निभृतनिभृतं बालयात्मप्रकाशत्रा
सात्पाणिः पथिफणिफणारत्नशोधी व्यधायि ॥ ९० ॥ मार्गे पंकचिते घनान्धतमसि निःशब्दसंचारया
गंतव्या घमयाम्नि यस्य वसतिर्मुग्धेति कृत्वा मतिं आजानूद्धृतनूपुराकरतले नाच्छाघनेत्रे भृशं कृच्छ्रा
लब्धपदस्थितिः स्वभवने पंथानमभ्यस्यति ॥ ९१ ॥ दूतीविघ्नमुपागता सहचरी रात्रिः सहस्थायिनी
दैवज्ञो दिशति स्वनेन जलदः प्रस्थानवेलां प्रभो वाचं मांगलिकीं तनोति तिमिरस्तोमो विभिल्ली
रवैर्जातो यं दयिताभिसारसमयो मुग्धे विमुंचत्रपाम् ॥ ९२ ॥ भीतासि नैव भुजगात्पथि मङ्गजस्य सं
गे पुनः किमपि कंपमुरीकरोषि अंभोधरध्वनिभिरत्वभितासि तन्वी मद्वाविवादनाश्य किमा
चरामि ॥ ९३ ॥ स्फुरदुरसिजभारभंगुरांगी किसलयकोमलकांतिनां पदेन अपकपथ्य कथं सहे
तगंतुं यदिन निशासु मनोरथोरथः स्यात् ॥ ९४ ॥ अथ नायकचिंतनम् आस्तां दूरे एव विश्लेषः प्रि
यामालिंगतो मम स्वेदः किं नु सरिन्नाथो रोमांचः किं न पर्वतः ॥ ९५ ॥ अद्यापि तन्मनसि संपरिवर्तते
मे रात्रौ मयि क्षुतवति क्षितिपालपुत्र्या ॥ ९६ ॥ अनुदिनमभ्यासदृढैः सोढुं दीर्घोपि शक्यते विरहः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥९७॥ नयनेन निरीक्षितान तां गी हृदयं हंत शराः पराभवंति विषमा विषमायुधव्यवस्था परिभूयेत प
रः परापराधैः ॥९८॥ अभिमुखे मयि संहृतमीक्षितं हसितमन्यनिमित्तकथोदयं विनयवारितवृत्तिरत
स्तया न विवृतो मदनो न च संवृतः ॥९९॥ धम्मिल्लं परिवद्धती न खमुखैः सीमंतमातन्वती पश्यंती नरवरो
॥७॥ 7 त्सवं कुच युगे सव्यापसव्यं मुहुः नाभीसीम निकुंचितांगुलिदलं नीवीभरं रुंधती शय्यागार विनिर्गता
पि हृदयान्नाद्यापि निष्क्रामति ॥१००॥ कुवलयनयनाकुंचांतरेषु क्षणमपि येषु न शेरते युवानः हरिहरकृ
पणपराङ्मुखो यं गणयन्ति तान्यपि वासराणि वेधाः ॥१॥ प्राणानां च प्रिया या प्रमूर्च्छाः सा हृश्यकारि
णः प्रियाकंठगतां रत्यै प्राणा मरणहेतवः ॥२॥ यान्त्यो मुहुर्वलितकंधरमाननं तदावृत्तवृत्तश
तपत्रनिभं वहन्त्या दिग्धोमृतेन च विषेण च पक्ष्मणाक्ष्या गाढं निखात इव मे हृदये कटाक्षः ॥३॥ को
नाम्रुखं स्फुरनकेलिविमर्दखेदसंजातघर्मकणविक्षुरितं रतांते आपांडुरं विलसदर्धनिमीलिता
क्षं संस्मृत्य हो हृदय किं शतधा न यासि ॥४॥ किं गतेन यदि सा न जीवति प्राणिति प्रियतमा तथापि
किं इत्युदीक्ष्य नवमेघमालिकां न प्रयाति पथिकः स्वमालयं ॥५॥ यदि स्मरामि तां तन्वीं जीविता शाकु
तो मम अथ विस्मृत्य जीवामि जीवितं व्यसनेन किं ॥६॥ यदि प्रिया वियोगेपि खिद्यते दीनदीपकं तदि
हृ दग्धमरणमुपयोगं कं यास्यति ॥७॥ दैवात्स्वप्ने यदि हि विचरन्त्वे श्यामप्रियां चे दाश्वासोदो ॥७॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तदन्तकथमाधवीयामवस्थां गताशातं तु नेच्च कथयतात्पन्नम् द्वैदतीयः प्राणत्राणं कथमपि करोत्याय
तासां सएकः ॥ ८ ॥ दह्यमानेपि हृदये मृगाक्ष्यामन्मथाग्निना स्नेहस्तथैव यत्नस्पोतदाश्चर्यमिवाभवत्
॥ ९ ॥ दयितावाहृष्टा शस्य कृतोयमपरो विधिः जीवयत्यर्पितः कंठे मारयत्यपवर्जितः ॥ १० ॥ वसंतमारं
भेचिरविरहखिन्नासहचरी यदि प्राणान्मुंचेत्तदिह वधभागी भवति कः वयोवास्ने हो वा कुसुमविशिखो
वेति विमृशन् तुहीत्पेतदृक्तं पिकनिकरझंकारमखिलोत्र ॥ ११ ॥ ऊरू रंभाद्दृग पिकमलं शैवलं केशपाशो
वक्त्रं चंद्रोल्लपितममृतं मध्यदेशो मृणालं नाभिं कूपो वलिरपि सरित्पल्लवः किं चपाणि यस्याः सा चेद्रसि
न कथं हन्तापस्पर्शांति ॥ १२ ॥ पुनरपि मिलनं यदा कदाचित्प्रियतमया कृपया भवेद्विधातुः हरिरि
व करवै हृदि प्रतिष्ठं हरइव किं तनवै तनोरभिन्नां ॥ १३ ॥ नायकं वाक्यं सखायं प्रति यामिभ्रं मसि वारिदा
गमदिने ज्ञानी हि मामागतं चिंतां चेतसि मा विधेहि कथय त्वेवं स वाष्पे मयि निःश्वासैः पवनायितं वरत
नोरङ्गैः कदंबायितं कांत्या केतकपत्रकायितमहो दृग्भ्यां पयोदायितं ॥ १४ ॥ वार्त्तां कापि न विज्ञातारवल
मपाभोपाम्य किं कथ्यतामेतावत्तव वेश्मनः परिसरे एणग दृश्यतावीदितं वाष्पव्याकुललोचनाः परिजनाः
पोरानिरुद्धो न सवा निःशेषो द्रुतपलवादि तिरूहो निःपद्मिनीकेसरः ॥ १५ ॥ द्वारिस्तंभनिषण्णयाम
लिनया वक्रीकृतग्रीवया नासाग्रागतवाष्पबिंदु वमनैः संसिंचमानास्मया त्वेन्दुस्तम्भितकंठगद्गद

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

गिरा मोच्चारिताधीत्तरं संदिष्टं तव कांतया पथिक हे वक्तुं न तान्यर्यते ॥१६॥ नायिकावाक्यं नायकं प्रति ॐ
कोपि महीधरो लघुतरो दोर्भ्यां धृतो लीलया तेन त्वं दिवि भूतले च सततं गोवर्द्धनो धारिका त्वां त्रैलोक्य
धरं वहामि कुचयोरग्रेन तद्गण्यते किं वा केशव भाषणेन बहुना पुण्यैर्यशो लभ्यते ॥१७॥ कान्ते कनक
॥८॥ जंबीरं करे किमपि कुर्वन्ति आगारलिखितं भानो विंडुमिंडम् खीदृदो ॥१८॥ कांते कथं चि ज्ञदितप्रयाणे
क्षणं विनम्रा विरहार्दिता गीतत स्तमालोक्य कदागतोसि त्वालिंग्य कांता मुदमाससाद ॥१९॥ गङ्
गवसिचेत्कांतं पन्थानः संतु ते शिवाः ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥२०॥ नायिकावाक्यं
सखीं प्रति मामवेभ्य हृत्कपोलतले च कास्ति कांतस्वहस्तलिखिता खलु मञ्जरीति: अन्यापि न
सखि भाजनमीदृशीनां वैरी न चेद्भवति वेपथुरन्तरायः ॥२१॥ भामिन्यो विदधत यागभागभाजः के
यूरं स्रजमवतंसमंबुजातैः धिग्देवं मम तु विभूषणं विदूरे रोलंवादधरनिवारणं पुमर्थः ॥२२॥ त्वयद्
ती भोपान्थ पुस्तकधरं क्षणमत्रतिष्ठ वैद्योसि किं गणक शास्त्र विचारदोसि केनौषधेन मम पश्यति नक्त
मं वा किं वागमिष्यति पतिः सुचिरप्रवासी ॥२३॥ नायिकावाक्यं दूतीं प्रति दूति श्वासविशेष एष किम
हो वंदित्वराधावनाद्भ्रष्टालकवल्लरी कथमहो त्वन्नाथपादार्पणात् विभ्रष्टाधरराग पल्लवरुचि
॥८॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्त्वत्कार्ये संजल्पनाद्रासस्तस्य किमंग संगतमहो विश्वासहेतोस्तव ॥२४॥ नाथ कश्चिद्देशागमनसमये नार्थिकाश्र
वस्यावर्णनम् यामीत्युक्ते हृदयपति नायं चशाः शंखभूषाः स्वैरं स्वैरं झटिति गलिताः पाणिपंकेरुहाग्रात् नो
यास्यामीत्यनुपदमिमां वाचमाकर्णयंत्यास्तन्व्याः शेषा अपि च वटूचरस्त्येव भंगं समीयुः ॥२५॥ यामीति प्रिय
प्रष्टायाः प्रियायाः कंठवर्त्मनि वचो जीवितयोस्तु रोनिःसरणेरणः ॥२६॥ अभ्यर्थ्ये किमपि जीवितजन्म
वंधोमत्कंठतो झटिति निःसरतावदेव कांते हृगंतपथिलं दिनिजीवतीति यावन्न कर्णपथमेति जनापवादः
॥२७॥ सांबमायैः प्रणयवचनैर्गंतुमापृच्छमाने कांते तिर्यग्नमितवदनारुंधती वा प्रपूरम् दीर्घोच्छ्वास
स्यगनविगलोत्कंपिनासापुटांतासे स्वाश्रून्यंगणयति मृगी लोचनांकं रूणानि ॥२८॥ अथ दंपत्योः
परस्परं पत्रलेखनम् प्राणेशविज्ञप्तिरियं मदीया तत्रैव नेयादिवसाः कियंतः संमत्य योग्यस्थितिरे
षदेशः कराहिमांशोरपितापयन्ति ॥२९॥ कराहिमांशोरपितापयंति नैनं तन्मिये चेतसि शंकनीयं वि
योगतप्ते हृदये मदीये तत्रस्थिता त्वं समुपेक्षितापम् ॥३०॥ अजनि प्रतिदिनमेषा कर्दमशेषा मदंगसं
गेन प्रतिदिनमहरियं यामदंति संपातिभिः सलिलैः ॥३१॥ त्वामालिख्य प्रणयकुपितां धातुरागैः शि
लायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे क्रूरस्त

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्मिन्नपि सहते संगमं नो कृतांतः ॥२२॥ अथ विरहिण्यपनस्या वर्णनं सखीवाक्यं नायकं प्रति महत्वं जनवीत
नैव हलचंदनासेचनैः सरोजदलसंगमैरथिन चेष्टते सुंदरी परं तु तव नाम निभृयस सखीभिराविद्वि
तेनिवेद्यतिजीवितं श्रवणसीम्नि रोमोद्गमः ॥२३॥ अच्छिन्नं नयनाम्बु बंधुषु कृतं तापः सखीष्वाहितो
॥ ९ ॥ न्यस्तं दैन्यमशेषतः परिजने चिंतामुरूभ्योर्पिता अद्य श्वः खलु निर्वृतिं व्रजति सा श्वासैः परं खिद्यते
९ विस्रब्धो भवति प्रयोगजनितं दुःखं विमुक्तं तया ॥२४॥ नव विरहमसह माना मा ऽऽगणनवलास्वयं विमु
क्तवती किं तु तया विधमंगेन स्तु लभमिति तेन विमुंचंति ॥२५॥ तस्या महाविरहवह्निशिखाक
लापतप्तेस्थितो सि सततं हृदये प्रियायाः प्रायेण शीकरसमेहृदि सा कृपालो वा लादृणं वसति
नैव खलु त्वदीये ॥२६॥ अथ मानेषु स्तूयमानं कृत्वा च पश्चात्तः स्वार्थं परित्यजेत्तात् स्वार्थभ्रं
शो हि मूर्खता ॥२७॥ यस्मिन्नि पतिते सौख्यं न हनाम्भ पजायते मुनयस्तद्धं प्राहुरग्र्यमेथश
ताधिकम् ॥२८॥ अथ पनायिका वाक्यं सखीं प्रति अथ वारूपमलयानलमपसारय चंदनं त्व
रिता योगेपवने धनयोः प्रबलो विरहानलो भविता ॥२९॥ ओदेति घनमंडली नटति नीलकंठ
वलीतडिद्दहति सर्वतो वहति केतकी मारुतः तथापि यदि नागतः स सखि तत्रमन्ये धुनाद्या
॥ ९ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तिमकरध्वजस्फुटितसिंजैनीकं धनुः ॥४०॥ विभेमि सखि संवीत्य भ्रमरीभृतकीटकं तं ध्याना द्रागते
पुस्त्वे तेन सार्धं कुतो रतिः ॥४१॥ वपुषि तव तनोति रन्तुभूयां प्रभूरिति धन्यतमासि किं ब्रवीमि सखी
तनुनयना न्तरालभीरुः कलयति मिनव भूषणानि कामः ॥४२ कलयति कमलोपमानमत्योः
प्रत्ययति बाचि सुधारसस्य साम्यं सखि कथय किमाचरामि कान्ते समजनि तत्र सहिष्णुतैव दोषः
॥४३॥ याः पश्यन्ति प्रियं स्वप्ने धन्याः स्ताः सखि योषितः अस्माकं तु गते कान्ते गतानि द्रापि वैरिणी
॥४४॥ यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः मौढाः कदं
वानिलाः सा चैवास्मि तथापि चौर्यसुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः स
मुत्कंठते ॥४५॥ यद्ज्ञाविनतद्ज्ञाविभाविचेननतदन्यथा इति चिंतः विषघोयमगदः किं न पीयते ॥४६॥
अपविरहिणीविलापः पंचत्वं तनुरेतु भूतनिवहः स्वं स्वं विशन्त्वालयं याचे त्वां द्रुहिण प्रणम्य शिरसा भूयो
पि कृत्वांजलिं तद्वापीषु पयस्तदीयमकुरे ज्योतिस्तदीयालये व्योम्नि व्योम तदीयवर्त्मनि धरा तत्तालवृन्ते निलः ॥४७॥ स्पृष्टाः पुरःपृष्टे मंदेकाहन्नमारुते च चीत्वयि गतवति हृदयेशे जीवनदाना पि जीवनं
हरति ॥४८॥ रोलंबो मधुपः पिकः परभृतो रंध्रान्तसारी मरुत्कीरो भाषितवाक्यमात्रपठनप्रौढः

पयोदोजडः हंसः संततपक्षपातनिरतस्तस्माद्वयस्यामिमांमुक्त्वाहं मेहिरिणीमिकेनकठिनस्वांतायकांता
॥१०॥ यमे॥५०॥ संतापयविरंचंद्रतत्रनप्रतिषिध्यसे निवारयकरस्य शंशिमस्याहं परिग्रहः॥५१॥ चलकं
यसिचंद्रदीधितिमविरलमभ्यासि नूनमंगारान् अधिकतरमसुखमनयोः किमिहच कोरावधारयसि
॥५२॥ हरनयनहुताशज्वालयायोजलाधार तिनयनजे लोधैः रवाकवाकीवहायातदपिदहतिवि
तंमामकं क्याकरोगीमदनशिरसिभूपः क्यावला आगलागी॥५३॥ इंदुस्तत्रनशोभतेष्मि यत्तमे
यत्रत्वदीयमुखं हंसस्तत्रनभासतेचरुतरां यस्यांगरागस्तव यत्रेन्दीवरगर्भकांतिदलने नेत्रेत्व
दीयोजिते तेनात्मीयस्तनेत्रतांसहरिणा धिकृत्यदूरंगताः॥५४॥ नामित्रेष्वपि कर्तव्यस द्विजिह्वं
कदाचनः क्रोडिं येचान्तगेवापि समं चंद्रः प्रकाशते॥५५॥ यमस्वनित्यं यदि शक्तिरस्ति तेदिने दि
नेगच्छति नायंयोवनंमन्तेन कोदासस्तिपिंडसंनिधौ निलोद्केः सार्धमलोमशंभगम्॥५६॥
इतिशृंगारसारसंग्रहः छ श्रीः श्रीः श्रीः श्रीः छ श्रीः श्रीः श्रीः श्रीः छ श्रीः श्रीः श्रीः श्रीः



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative